नङ्किता-त्री, नङ्कयिता-त्री, निनङ्किषिता-त्री, नानङ्किता-त्री; इत्यादीनि सर्वाणि रूपाणि भौवादिककक (140) धातुवत् बोध्यानि। अस्य परस्मैपदित्वात् नङ्कन्-न्ती, नङ्किष्यन्-न्ती-ती; इत्यादीनि रूपाण्यस्य शतरि भवन्ति इति विशेषः।

(657) "णट नृत्तौ" (I-भ्वादिः-310. (781) अक. सेट्. पर.) [अ]

घटादिः।

'नृत्तौ नटत्यवस्पन्दे चुरादेर्णिचि नाटयेत्।' (श्लो. 76) इति देवः।
नाटकः-टिका, [1]प्रणटकः-प्रनाटकः-टिका, निनटिषकः-षिका, नानटकः-टिका;
नटिता-त्री, प्रणटयिता-प्रनाटयिता-त्री, निनटिषिता-त्री, नानटिता-त्री;
नटन्,न्ती, [2]प्रणटयन्-नटयन्, प्रनाटयन्-न्ती, निनटिषन्-न्ती; —
नटिष्यन्-न्ती-ती, प्रणटयिष्यन्-प्रनाटयिष्यन्-न्ती-ती, निनटिषिष्यन्-न्ती-ती;
व्यतिनटमानः, व्यतिनटिष्यमाणः, — नानट्यमानः, नानटिष्यमाणः;
नट्-नड्-नटौ-नटः; — — —
नटितम्-तः, नटितः-नाटितः, निनटिषितः, नानटितः-तवान्;

---

1. नृत्तनृत्ययोरर्थयोः मित्त्वात् णौ परतः, 'मितां ह्रस्वः' (6-4-92) इत्युपधाया ह्रस्वो भवति। णोपदेशत्वाच्च णत्वमपि भवति। अन्यत्र तु मित्त्वं, णोपदेशत्वं च न। अत एव ण्यन्ते सर्वत्र रूपद्वयं प्रदर्शितम्।

2. 'अणावकर्मकाच्चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् परस्मैपदमेव, न शानच्।

[अ] घटादौ 'णट नृत्तौ' इति पठ्यते। भ्वादावेव पूर्वमपि एवमेव पठितम्। अत्र घटादिपठितस्य धातोः नृत्यं, नृत्तं चार्थः। पदार्थाभिनयो नृत्यम्। अभिनयशून्यः शास्त्रोक्ताङ्गभङ्गरूपः गात्रविक्षेपो नृत्तम्; यत्कारिषु नर्तकव्यपदेशः प्रसिद्धः। अनयोरर्थयोर्मित्त्वप्रयुक्तं कार्यं भवति। णोपदेशत्वमप्यस्मिन्नेवार्थे। अवस्पन्दनरूपार्थे तु मित्त्वं न। णोपदेशकारिकायाम्, 'अणाटि' इति दीर्घघटितनिर्देशेन, दीर्घाद्यस्य णोपदेशत्वं प्रतिषिध्यते। क्षीरस्वामी तु 'नतौ' इति पठित्वा, 'नटयति शाखाम्' इत्युदाहृत्य, 'नृत्तौ तु नटति, नाटयति।' इत्युक्तवान्। 'नृत्तौ' इत्यस्य, नाट्यमित्यर्थोऽभिमत इति वक्तव्यम्; नृत्तनृत्ययोस्त्वर्थयोर्मित्संज्ञायाः सर्वाभिमतत्वात्। 'नट गतौ' इत्यन्ये पठन्ति।